Semester-IV, CC-8, Sec-B, Paleography, Antiquity of the art of Writing.

# भारतवर्षे लिखनस्य प्राचीनत्वम्

भारतवर्षे प्राचीनकालादेव लिप्याः लिखनस्य वा प्रचलनम् आसीत्, अस्मिन् विषये संशयस्य अवकाशोऽपि नास्ति। सिन्धुसभ्यतायाः समये भारतवर्षे लिप्याः प्रचलनम् आसीत्, अस्मिन् विषये ऐतिहासिकं प्रमाणम् अपि प्राप्यते। परन्तुः कस्मात् कालात् आरभ्य लिपेः लिखनस्य वा प्रचलनम् आसीत् इति वक्तुं न शक्यते। भारतवर्षे लिखनस्य प्राचीनताविषये वैदिकादीनि यानि प्रमाणानि प्राप्यन्ते तानि अधस्तात् आलोच्यन्ते।

प्रथमतः वैदिकप्रमाणम् – भारतवर्षे लिपेः प्राचीनताविषये यानि साहित्यप्रमाणानि प्राप्यन्ते तेषु वैदिकप्रमाणम् प्राथम्यम् भजते। वैदिकसाहित्यस्य पाठसौकर्यार्थं शुद्धपाठस्य रक्षार्थं च पदपाठादीनाम् उपायानाम् उल्लेखः लिखनपरम्परायाम् प्राप्यते। किञ्च वेदचतुष्टयस्य शाखाभेदेन प्रयुक्तानि स्वरादिबोधकानि चिह्नानि भारतवर्षे लिखनस्य ऐतिह्यम् एव प्रकटीकुर्वन्ति। लिखनं विहाय वैदिकप्रातिशाख्यानि न प्रणीतानि अभवन्। केषाञ्चिन् मतानुसारम् वैदिकसंहितायाः अक्षसूक्ते लिखनाभ्यासस्य सङ्केतः प्राप्यते। ऋग्वेदस्य दशममण्डले राज्ञा सावर्णिना गोदानस्य तथा गोकर्णे ८संक्ष्यया अङ्कनस्य उल्लेखः प्राप्यते। तथा च आम्नातम् - "सहस्रं मे ददतो अष्टकर्ण्यः" इति। ओम् इति प्रतीकम् अपि ब्रह्मणः प्रतीकरूपेण उपनिषत्सु व्यवहृतम्। शब्दप्रतीकरूपेण केवलम् अस्य प्रचलनम् आसीत् इति वक्तुं शक्यते, परन्तु मङ्गलप्रतिपादकस्य अस्य अक्षरस्य किमपि लिखितं रूपं नासीत्। वैदिकसाहित्येषु अक्षर-पटल-काण्डादीनाम् पारिभाषिकशब्दानाम् व्यवहारः प्रमाणयति यत्, प्राचीनकाले भारतवर्षे लिखनस्य प्रचलनम् आसीत्। छान्दोग्योपनिषदि उक्तम् - "हिंकार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम्"। एतद्वचनमेव लिखनस्य प्रामाण्यं प्रतिपादयति।

वैदिकसाहित्यस्य ब्राह्मणभागः गद्यरीत्या प्रणीतः आसीत्। विशालाकारम् गद्यसाहित्यमपि लिखनस्य प्रचलनविषये प्रमाणपदवीं भजते। शतपथब्राह्मणस्य दिवसस्य रात्रेश्च मुहूर्तविभागः,

तस्य गाणितिकी प्रक्रिया अपि प्रमाणयति यत् प्राचीनकाले भारतवर्षे लिखनस्य प्रचलनम् आसीत्।

द्वितीयतः वेदाङ्गप्रमाणम् – वेदाङ्गेषु कल्पसूत्रे, शुल्वसूत्रे तथा ज्योतिषे ये तावत् गाणितिकप्रयोगाः दृश्यन्ते, तेषां पर्यायक्रमिकता लिखनकलायाः प्रचलनं विना न सम्भवति। सूत्रसाहित्येषु वशिष्ठस्य धर्मसूत्रे तथा विष्णुधर्मसूत्रे लिखितप्रमाणस्य स्वीकृतिः दृश्यते। गौतमधर्मसूत्रे साक्षिकृतस्य स्वाक्षरस्य उल्लेखः प्राप्यते। अतः तस्मिन् समये भारतवर्षे लिखनस्य प्रचलनम् आसीत् इति ज्ञातुं शक्यते। केचन विद्वांसः "उत त्वः पश्यन् न ददर्श वाचम्" इति मन्त्रम् तस्मिन् समये लिखनरीतिविषये प्रमाणरूपेण समुपस्थापयन्ति। अन्ये केचन पण्डिताः तन्मतं न अङ्गीकुर्वन्ति।

यास्कस्य निरुक्तग्रन्थे अनेकानां पूर्वाचार्याणां मतानि उल्लिखितानि। यथा – औदुम्बरायणः, अग्रायणः, और्णवाभः, गार्ग्यः, गालवः, कौत्सः, शाकपूणिः, शाकटायनः प्रभृतयः। एषां पूर्वाचार्याणां नामविवरणात् एव अनुमातुं शक्यते यत्, शब्दस्य निर्वचनरीतिः अतीव प्राचीना। पाणिनिविरचितम् अष्टाध्यायीति व्याकरणम् लिखनस्य ऐतिह्यविषये मूर्तम् प्रमाणम्। अत्र लिपिकरः लिविकरः इति शब्दाः प्राप्यन्ते। अस्मिन् व्याकरणे एकं सूत्रम् प्राप्यते , यत्र यवनम् यवनानी चेति पदद्वयम् प्राप्यते। अस्य व्याख्यायाम् कात्यायनेन उक्तम् यवनलिप्याम्, पतञ्जलिना च व्याख्यातम् यवलिप्यामिति वक्तव्यम्। अर्थात् लिखनकलया सह आचार्याणां परिचयः आसीत्। "स्वरितेनाधिकारः" एतत्सूत्रानुसारम् स्वरितचिह्नयुक्तानि सूत्राणि अधिकारसूत्ररूपेण प्रतिपादितानि। लिखनस्य प्रचलनम् यदि नासीत् तर्हि चिह्नप्रदानस्य प्रसङ्गोऽपि नागच्छति। वस्तुतस्तु श्रौतपरम्पराम् अवलम्ब्य वैदिकवाङ्मयस्य प्रवाहो भवेत् इत्येव आसीत् ऋषीणाम् अभीष्टम्। तथापि शास्त्रग्रन्थानाम् पाठार्थम् रक्षनार्थम् च अनिवार्यतया लिखनस्य प्रवर्तनम् अभवत्। यद्यपि एतादृशः व्यवहारः वैदिकसंस्कारेषु न समाद्रियते। पाणिनीयशिक्षायाम् लिखितपाठकः पाठकाधमः इत्युच्यते। तदुक्तं तत्र –

"गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।

अनर्थकज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥” इति।

एतेनापि प्रमीयते यत् लिखनस्य प्रचलनम् तस्मिन् समये आसीत्।

तृतीयतः बौद्धग्रन्थेषु लिखनकलायाः प्रमाणम् – आलेकजाण्डारस्य भारताक्रमणात् पूर्वम् ख्रीष्टपूर्वे पञ्चमशतके षष्ठशतके वा प्राचीनस्य पालिसाहित्यस्य प्राथमिकम् स्तरनिर्माणम् अभवत्। प्राचीनेषु पालिबौद्धानुशासनमूलकेषु साहित्येषु न केवलम् भारतवर्षस्य लिखनकलायाः प्रचलनस्य उल्लेखः दृश्यते, अपि तु एतदपि ज्ञायते यत्, तादृशस्य अनुशासनस्य रचनाकाले भारतवर्षे लिपीनां व्यवहारोऽपि बहुलतया आसीत्। विनयपिटके लिखनशैल्याः प्रशंसा दृश्यते। भिक्खु-पाचित्तियः इति ग्रन्थे तथा भिक्खनी पाचित्तियः इति ग्रन्थेऽपि लेखस्य तथा लेखकस्य उल्लेखः प्राप्यते। भिक्खुपाचित्तियग्रन्थे गृहिणः तथा तस्य पुत्राणां कृते लेखकवृत्तिरेव जीवनधारणस्य साधूपायत्वेन वर्णिता। विनयपिटके अक्खरिका इति कस्याश्चित् क्रीडायाः उल्लेखः दृश्यते, यत्र क्रीडायाम् लिखनस्य उल्लेखः प्राप्यते। जातकेषु पत्राणाम् निदर्शनम् प्राप्यते। महावग्गस्य एकस्मिन् स्थाने प्राथमिकविद्यालयेषु पाठ्यविषयरूपेण लेखस्य, गणनायाः तथा रूपस्य समुल्लेखः प्राप्यते। खारवेलस्य हस्तिगुम्फाभिलेखे अपि एतेषां विषयाणां विवरणम् अस्ति। बौद्धजातके फलकस्य तथा वर्णकस्य उल्लेखः अस्ति। किं बहुना, तत्र पुरुषविशेषाणां पत्राणाम् तथा प्रशासनिकपत्राणाम् अपि समुल्लेखः दृश्यते। ललितविस्तरे ६४ लिपीनाम् उल्लेखः अस्ति। तासु ब्राह्मी, खरोष्ठी, द्राविडी डामिली वा, पुष्करसारी च अन्यतमं स्थानं भजते

चतुर्थतः जैनग्रन्थेषु लिखनकलायाः प्रमाणम् – जैनसमवायाङ्गसूत्रस्य विवरणम् पुनरपि पण्णावनासूत्रे पुनरावृत्तम्। अत्र भारतवर्षस्य प्राचीनतमायाः लिप्याः ब्राह्म्याः उल्लेखः अस्ति। अत्र पृथक्तया वर्णमाला अपि समुपलभ्यते। लुप्तजैनग्रन्थाद् दृष्टिवादाद् ज्ञायते, ब्राह्मीवर्णमालायाम् ४६ संख्यकानाम् मौलिकचिह्नानाम् अस्तित्वम् ज्ञायते।

पञ्चमतः आदिमहाकाव्येषु प्रमाणम् – भारतवर्षस्य प्राचीनम् महाकाव्यद्वयं हि बाल्मीकिविरचितं रामायणम्, व्यासरचितं महाभारतं च। उभयत्र एव लिखनस्य बहूनि प्रमाणानि

प्राप्यन्ते। रामायणे तथा महाभारते लिखः, लेखनम्, लेखा, लेखकः इति शब्दानाम् उल्लेखः अस्ति। महाभारतस्य ऐतिह्यानुसारं वक्तुं शक्यते यत्, व्यासः दक्षलेखकं गणेशम् एव लिपिकररूपेण नियुक्तवान्। भारतीयपरम्परानुसारं वैदिकसाहित्यस्य विन्यासः कृष्णद्वैपायनव्यासेन कृतः। तस्मादेव कारणात् तस्य नाम अपि वेदव्यास आसीत्। वैदिकसाहित्यस्य मण्डलसूक्तादिरूपेण विभाजनम् एव लिखनपरम्परां प्रति कारणम् इति वक्तुं शक्यते।

षष्ठतः स्मृतिशास्त्रेषु प्रमाणम् – नारदस्मृतौ व्यवहारविधिप्रसङ्गे लिखितप्रमाणं व्याख्यातुम् लिखनस्य उपरि एव गुरुत्वम् आरोपितम्। तदुक्तं तत्र –

"नाकरिष्यद् यदि ब्रह्मा लिखितं चक्षुरुत्तमम्।

तत्रेयमस्य लोकस्य नाभविष्यच्छुभा गतिः।।" इति।

मनुसंहितायाः रचना एव प्रमाणयति यत्, तस्मिन् समये लिखनस्य कौशलम् समग्रे भारतवर्षे विस्तीर्णतया व्याप्तं चर्चितं च। लिखितप्रमाणस्य तथा राजशासनस्य उल्लेखः अपि दृश्यते। याज्ञवल्क्यसंहितायाम् निगदितम् - "प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्' इति। मेधातिथिना मनुसंहितायाः टीकायाम् लिखितम् - "लिखितं लिखितेनेव साक्षिमच्चैव साक्षिभिः" इति।

सप्तमतः कौटिलीयार्थशास्त्रे प्रमाणम् – कौटिल्येन विरचिते अर्थशास्त्रे साक्षात् लिखनस्य कानिचन प्रमाणानि समुपलभ्यन्ते। तानि हि - "वृत्तचौलकर्मा लिपिसंस्थानं चोपयुञ्जीत' इति। अत्र लिखनस्य तथा गणनायाः प्रसङ्गः अस्ति। मन्त्रिपरिषदा राजा पत्रद्वारेण मन्त्रणां कुर्यात् इति विषयोऽपि अर्थशास्त्रे प्राप्यते। संकेतलिप्या सह चरप्रेषणस्य प्रसङ्गोऽपि अस्मिन् ग्रन्थे अस्ति। अर्थशास्त्रस्य शासनाधिकारे राज्ञः विविधम् तथ्योपेतपत्रम्, शासनस्य प्रकारः, शासनस्य दोषाः आलोचिताः। ध्रुपदीसंस्कृतस्य साहित्येषु लिखनस्य कथा अस्ति। महाकविः कालिदासः लिपिज्ञानस्य उपयोगिताम् उपमाद्वारा स्पष्टीकृतवान्। तदुक्तं तेन - " लिपेर्यथावद्ग्रहणेन वाङ्मयं

नदीमुखेनेव समुद्रमाविशत्” इति। वात्सायनस्य कामसूत्रे पुस्तकवाचनम् पाण्डुलिपिपाठो वा ६४ कलासु अन्यतमं स्थानं भजते।

अष्टमतः वैदेशिकप्रमाणम् –भारतवर्षे लिखनस्य प्राचनीनताविषये वैदेशिकप्रमाणम् अपि प्राप्यते। आलेकजाण्डारस्य अन्यतमः सेनापतिः नियार्कसमहोदयः ज्ञापयति यत् हिन्दवः तन्तुपटम् उत्तमतया आहत्य तस्योपरि लिखन्ति स्म। भारतीया लिपिः ब्रह्मणा सृष्टा इति विषयं सुयान्-जां महोदयोऽपि उल्लिखितवान्। अलविरुणेः मतानुसारम् हिन्दवः कस्मिंश्चित् समये लिखनं विस्मृतवन्तः। ततश्च दिव्यानुप्रेरणावशात् पराशरपुत्रः व्यासः तत्पुनः आविष्कृतवान्। नारदस्मृतावपि ब्रह्मा लिपेः जनकतया वर्णितः। अतः भारतवर्षे लिखनस्य प्राचीनत्वं सर्वसम्मतम् इति वक्तुं शक्यते।

नवमतः प्रत्नलेखस्य प्रमाणम् – महाराजस्य अशोकस्य अभिलेखाः भारतोपमहादेशस्य विविधेषु स्थानेषु ब्राह्मीलिप्या खरोष्ठीलिप्या च उत्कीर्णाः आसन्। एषाम् अभिलेखानाम् एकैकस्य अक्षरस्य स्थानभेदेन एकैकं रूपं प्राप्यते। यथा अकारस्य दशविधं रूपं प्राप्यते। विषयेऽस्मिन् आञ्चलिकः प्रभावः अपि परिलक्ष्यते। अशोकस्य अभिलेखे या लिपिः व्यवहृता, सा बहुशताब्दीं यावत् विवर्तनेन सम्भवति। यद्वा भवतु नाम भारतवर्षे लिखनस्य प्रचलनम् सुप्राचीनकालादेव आसीत् इति निश्चप्रचं वक्तुं शक्यते इति शम्।।